## संस्कृत (कक्षा 9)

| *अधिगम-प्रतिफलानि* | *उपयुक्तानि संसाधनानि* | *प्रस्ताविताः गतिविधयः (शिक्षकाणामभिभावकानाम् वा साहायेन विधेयाः)* |
|---|---|---|
| • विद्यार्थी सरलसंस्कृतभाषया कक्षोपयोगीनि वाक्यानि वक्तुं समर्थः अस्ति।<br>• विद्यार्थी कक्षातः बहिः दैनन्दिन-जीवनोपयोगीनि वाक्यानि वदति। | एनसीईआरटीद्वारा अथवा राज्यद्वारा निर्मितानि पाठ्यपुस्तकानि, गृहे उपलब्धाः पठनलेखनसामग्र्यः अन्यदृश्यश्रव्यसामग्र्यः यथा इंटर्नेट-वेबसाइट, रेडिओदूरदर्शनादिषु उपलभ्यन्ते | **सप्ताहः -1**<br>**श्रवणसम्भाषणकौशले**<br>1. शिक्षणक्रमे शिक्षकः सरल-संस्कृत-वाक्यानां प्रयोगं कुर्यात्। छात्राणामवबोधनं श्रवणकौशलम् च परीक्षितुं मध्ये मध्ये प्रश्नान् पृच्छेत्। संस्कृतभाषावबोधनसमये छात्रैः काठिन्यमनुभूयते चेत् मध्ये मध्ये हिन्दीभाषायाः क्षेत्रियभाषायाः अपि प्रयोगः करणीयः।<br>**उदाहरणम् -**<br>बालः – सुप्रभातम्। महोदये! किम् अहम् अन्तः आगन्तुं शक्नोमि?<br>शिक्षिका – आम्। आगच्छ।<br>प्रियंका - क्षम्यतां महोदये!, अहम् इमं श्लोकं सम्यक् रूपेण न अवगच्छामि। कृपया पुनः एकबारं बोधयतु।<br>शिक्षिका – अस्तु, पुनः एकवारं बोधयामि।<br>प्रियंका - महोदये! अधुना श्लोकार्थः स्पष्टः। धन्यवादः।<br>2. शिक्षिका प्रारम्भे छात्रान् दैनन्दिन-जीवनोपयोगिनः प्रश्नान् पृच्छेत्।<br>यथा – अद्य गृहे मात्रा सह कीदृशः वार्तालापः कृतः?<br>मातः! अद्य अहं किमपि स्वादुभोजनम् वांछामि। किं सायंकाले विपणिं गमिष्यति? मिष्टान्नम् च आनेष्यति?<br>3. इण्टरनेट्मध्ये उपलब्धानि संस्कृतगीतानाम् श्रवणम् भवेत् |
| • अपठितगद्यांशं पठित्वा तदाधारितप्रश्नानामुत्तरप्रदाने सक्षमः अस्ति।<br>• सरल-संस्कृत-भाषया औपचारिक-अनौपचारिक-पत्रलेखनार्हः भवति।<br>• अनुच्छेद-लेखनं, संवाद-लेखनं | | **सप्ताहः– 2 (प्रथमसप्ताहगतिविधिभिः सह)**<br>**पठनलेखनकौशले**<br>1. पाठ्यपुस्तकेतर-साहित्येभ्यः स्तरानुकूलं कथाः निबन्धान् च संगृह्य सप्ताहे एकवारं पठितुं छात्रान् निर्दिशेत्। तदाधारित-प्रश्नान् पृच्छेत्, चर्चां कुर्यात्। एवं संस्कृतमयवातावरणनिर्माणं कुर्यात्। छात्राणामधिकाधिकी सहभागिता भवेदिति सुनिश्चितं कुर्यात्।<br>**यथा -**<br>स्वच्छता अस्माकं जीवने अत्यावश्यकी। यदि वयं गृहे आपणे मार्गे विद्यालये कार्यालयादिषु स्थानेषु जीवनव्यवहारे सर्वथा स्वच्छतां पालयामः, वयं स्वस्थाः भवामः। स्वस्थशरीरस्य मनसः च कृते स्वच्छता महत्त्वपूर्णं स्थानं भजते। स्वस्थे च शरीरे स्वस्थं मनः निवसति, स्वस्थे च मनसि वयं सत्कर्मणि प्रवृत्ताः भवामः।<br>प्रश्नाः – क. जीवने का आवश्यकी? (एकपदेन) |

| | | |
|---|---|---|
| चित्राधारित-<br>वर्णनञ्च करोति। | | ख. वयं कथं स्वस्थाः भवामः? (पूर्णवाक्येन)<br>ग. स्वस्थं मनः इत्यनयोः पदयोः किं विशेषणपदम्?<br>घ. अस्य अनुच्छेदस्य कृते समुचितम् शीर्षकं लिखत।<br>2. औपचारिक-अनौपचारिक-पत्राणां प्रारूपं पदाय विषयगत-चर्चां च विधाय छात्रैः पूर्णं पत्रं लेखयेत्, अशुद्धीनां च संशोधनं कृत्वा पुनः बोधयेत्। छात्रैः तेषां पत्राणां कक्षायां प्रस्तुतिं कारयेत्। अनन्तरं तेषां प्रतिपुष्टिं प्रदद्यात्।<br>यथा - अवकाशार्थं प्रधानाचार्यं प्रति पत्रम्, जिलाधिकारिणं प्रति पत्रम् इत्यादीनि (औपचारिकपत्रम्)<br>मित्रस्य कृते पत्रम्। पुत्रस्य पितरं प्रति पत्रम् इत्यादीनि। (अनौपचारिकपत्रम्)<br>3. शिक्षकः कम् अपि विषयम् अवलम्ब्य प्रतिछात्रम् एकैकं वाक्यं रचयितुं कथयेत्। तानि वाक्यानि संकलय्य सार्थकम् अनुच्छेदं सज्जीकुर्यात्। एवं संस्कृतमयवातावरणे कक्षायां संवादवाचनस्य अनुच्छेदलेखनस्य च अभ्यासं कारयेत्। यथा – कोरोना-प्रतिकारः, पर्यावरणं संरक्षणम्, स्वच्छभारतम्, विद्यायाः महत्त्वम् इत्यादयः।<br>• कामपि परिस्थितिं मनसि निधाय कांश्चन प्रश्नान् पृष्ट्वा संवादाय उत्तरप्रदानाय च निर्दिशेत्। छात्राणाम् उत्तराणि च संशोध्य संवादालेखनं कारयेत्। यथा -- छात्रशिक्षकयोः वार्तालापः, मित्र-संवादः इत्यादयः।<br>• संवादशैलीम् अनुकर्तुं दूरदर्शने आकाशवाण्याञ्च संस्कृत-समाचारं श्रोतुं द्रष्टुं च निर्दिशेत्।<br>• कानिचन चित्राणि दर्शयित्वा तद्विषये वक्तुं लेखितुं च छात्रान् आदिशेत्। अशुद्धीनां च संशोधनं कृत्वा पुनः लेखितुं निर्दिशेत्। |
| • पाठ्यपुस्तकगतान् गद्यपाठान् अवबुध्य तेषां सारांशं वक्तुं लिखितुं च समर्थः अस्ति।<br>• तदाधारितानां प्रश्नानाम् उत्तराणि संस्कृतेन वदति | | **सप्ताहः– 3 (प्रथमसप्ताहद्वयस्य गतिविधिभिः सह गद्यपाठस्य अध्ययनम्) पठनलेखनश्रवणसम्भाषणकौशलानि**<br>कथादयः गद्यपाठाः यथासंभवं प्रत्यक्षविधिना पाठनीयाः।<br>शिक्षकेण आदर्शवाचनं, छात्रैः व्यक्तिगतरूपेण समूहे वा अनुवाचनम्, अपरिचितपदानाम् अर्थावबोधनम्, पाठस्य भावावबोधनं च। छात्राणाम् अवबोधं परीक्षितुं मध्ये मध्ये प्रश्नाः अपि प्रष्टव्याः। छात्रैः पाठस्य सारांशः संस्कृतेन स्वभाषया वा प्रस्तोतव्यः। शिक्षकः यथास्थानं संशोधनं कारयेत्।<br>पाठनप्रसंगे केचन एतादृशाः अपि प्रश्नाः प्रष्टुं शक्यन्ते येन छात्राः |

| | | |
|---|---|---|
| लिखति च। | | चिन्तनार्थं अवसरं लभेरन्, विचार्य ते निष्कर्षमवाप्नुयुः, यथा – भवान् अस्यां परिस्थितौ भवेत् चेत् किं कुर्यात्? पाठस्य नायकेन नायिकया वा यः निर्णयः गृहीतः किं स एव निर्णयः समीचीनो वा?<br>यथा - पाठस्य नाम – स्वर्णकाकः<br>प्रश्नः – क. बालिकायाः स्वभावः कीदृशः आसीत्।<br>ख. स्वर्णकाक-पाठस्य प्रेष्यं सन्देशं लिखत। |
| • संस्कृतश्लोकान् उचित-बलाघात-पूर्वकं छन्दोनुगुणम् उच्चारयति।<br>• श्लोके प्रयुक्तानां सन्धियुक्तपदानां विच्छेदं करोति।<br>• श्लोकान्वयं कर्तुं समर्थः अस्ति।<br>• तेषां भावार्थं प्रकटयति।<br>• श्लोकाधारितानां प्रश्नानाम् उत्तराणि संस्कृतेन वदति लिखति च। | | **सप्ताहः– 4 (पूर्वसप्ताहानाम् गतिविधिभिः सह पद्यपाठस्य अध्ययनम्) पठनलेखनश्रवणसम्भाषणव्याकरणकौशलानि**<br>• संस्कृतश्लोकानां गीतानां वा पाठनसमये शिक्षकः सस्वरवाचनं कुर्यात्। अथ्वा ई-सामग्रीणाम् उपयोगम् कुर्यात्। यदा कदा व्यक्तिगतरूपेण समूहे वा अनुवाचनं कारयेत्। छात्राः स्खलनं कुर्वन्ति चेत् प्रेम्णा शनैः शनैः दोषाः अपसारणीयाः।<br>• क्लिष्टानां पदानाम् अर्थं बोधयेत्, सन्धियुक्तपदानां विच्छेदं कुर्यात् कारतेत् च, श्लोकानाम् अन्वयपूर्वकम् अर्थं बोधयेत् च। छात्राणाम् अवबोधं परीक्षितुं मध्ये मध्ये प्रश्नाः अपि प्रष्टव्याः।<br>• संस्कृतसाहित्ये समुपलब्ध-नैतिक-सामाजिक-मूल्यान्याधृत्य स्वकीयान् विचारान् प्रकटयितुं निर्दिशेत्।<br>• छात्रैः पाठस्य सारांशः संस्कृतेन स्वभाषया वा प्रस्तोतव्यः। शिक्षकः यथास्थानं संशोधनं कारयेत्। पाठनप्रसंगे केचन एतादृशाः अपि प्रश्नाः प्रष्टुं शक्यन्ते येन छात्राः चिन्तनार्थं अवसरं लभेरन्।<br>**यथा -** पाठस्य नाम – सूक्तिमौक्तिकम्<br>गुणेष्वेव हि कर्तव्यः प्रयत्नः पुरुषैः सदा।<br>गुणयुक्तो दरिद्रोऽपि नेश्वरैरगुणैः समः॥<br>**पदच्छेदः** – गुणेषु + एव<br>दरिद्रः + अपि<br>न + ईश्वरैः + अगुणैः<br>**अन्वयः** – पुरुषैः सदा हि गुणेषु एव प्रयत्नः कर्तव्यः। गुणयुक्तः दरिद्रः अपि अगुणैः ईश्वरैः समः न।<br>**भावार्थः** – धनापेक्षया मानवीयगुणानाम् अधिकं महत्त्वं भवति।<br>**प्रश्नः** – क. किमर्थं पुरुषैः गुणप्राप्तेः प्रयत्नः करणीयः। |